
राजतन्त्रं सदा जीव्यात्

(राजतन्त्र सदा जीवित रहोस्)

Long Live Monarchy



पूर्णप्रसाद ब्राह्मण

कृतज्ञता-अर्पण
Gratitute-Expressed

यस पुस्तकको अंग्रेजी अनुवादको लागि श्री प्रदीप पौडेल (लैनचौर), श्री बिष्णु प्रसाद सुवेदी, (सानेपा) श्री निर्मल कुमार रिमाल (कालिकास्थान), युक्तमान गुरूङ्ग (गोरखा) बाट र पछि गएर खास गरी श्रद्धेय समाजसेवी श्री कृष्ण बहादुर मानन्धरज्यू (हे. मा. पद्मोदय हाईस्कूल) बाट सहयोग भएको हो । त्यस निति म वहाँहरू प्रति ज्यादै कृतज्ञ छु र ऋणी पनि छु ।

साथै यस पुस्तकको प्रकाशनको लागि माननीय शिक्षासंस्कृतिमंत्री रणधीर सुब्बाज्यूले रा. शि. समितिमार्फत दश हजार रू. को र नारायणी अञ्चलाधीश श्री लक्ष्य बहादुर गुरूङ्गजीले वीरगंज–उद्योग-–वाणिज्यसंघ मार्फत तीन हजार रू. को आर्थिक सहायता दिलाइदिनुभएकोमा उहाँहरू प्रति म हार्दिक कृतज्ञता व्यक्त गर्दछु । यस पुस्तिकाको निंति कभर पेजको ब्लक उपलब्ध गराई सहयोग गरेबापत श्री सूचना विभाग, श्री ५ को सरकारलाई म हार्दिक धन्यवादप्रदान गर्छु । अरू कतिपय आर्थिक सहयोगीहरूको चाहिं मैले यहाँ नाम उल्लेख गरेको छैन, जसलाई मैले यथासम्भव राजनीतिक सहयोग पुऱ्याउनुपर्ने छ ।

I have received invaluable co-operation from Mr. Pradeep Paudyal (Lainchaur), Mr. Bishnu Prasad Suvedi (Sanepa), Mr. Nirmal Kumar Rimal (Kalikasthan) and Mr. Yukta Man Gurung (Gorkha) in the English rendering of the text. It was finally supervised by Mr. Krishna Bahadur Manandhar (Head master-Padmodaya Secondary School) I owe a debt to them.

I am deeply grateful to Hon'ble Minister of Education and Culture for donation of Rs. 10,000/- which was made available through the National Education Committee for the poblication of this book. Also I must express my gratitude to Narayani Zonal Commissioner for the financial assistance of Rs. 3000/- made available through Birgunj Chamber of Commerce and Industry. My thanks are due to the Publicity Department, His Majesty's Government for kindly making blocks available for the front cover.

I have not made mention of many donors of financial help to whom I owe a political debt.

राजतन्त्रं सदा जीव्यात्

(राजतन्त्र सदा जीवित रहोस्)

Long Live Monarchy

पूर्णप्रसाद ब्राह्मण

प्रकाशकः– पूर्णप्रसाद ब्राह्मण
ताहाचल, काठमाडौं ।

प्रथम संस्करण
वि० सं० २०४२।१२

मूल्य रू. १०१।–

मुद्रकः संकल्प प्रिन्टिङ्ग प्रेस (प्रा०) लि०, कालीमाटी,
फोनः २–१५०५५

Publisher: Purna Prasad Brahman.
Tahachal, Kathmandu.

First Edition in
February, 1986

Price Rs. 101/-

Printed at Sangkalpa Printing Press (Pvt.) Ltd.
Phone: 2-15055.

'ब्राह्मण' जीलाई सधैं संझाई राख्ने,
यो अति महत्वपूर्ण पुस्तक हो।
अरु प्रति नभेटिएको हुंदा सुरक्षित
राखी पढी फिर्ता गर्नु हुन
हार्दिक अनुरोध गर्दछौं ।
'ब्राह्मण' जीका परिवार

कि

संर

देश

व्य

व्या

दीध

देशे

क्रि

चा

जी

व्या

रा

सैध

शक

ना

तस

स्त

—

प्राक्कथनम्

(१) विश्वस्मिन् राजतन्त्रस्य कियदमूल्यं प्रदानमासीत्तथेतश्च तस्य कियत्यावश्यकताऽस्तीति विश्वजनसमुदायस्य प्रबोधनक्रमे राजतन्त्रस्य संरक्षणं स्वराष्ट्रियसंस्कृतेर्गर्वगौरवयोः संरक्षणमेवेति समस्तानां राजतन्त्र-देशजनानां राजतन्त्रसंबन्धिनीं भक्तिमास्थां श्रद्धां च द्रढयितुम्,

(२) विश्वशान्तये, सर्वाङ्गीणराष्ट्रियहितसंरक्षणाय च राजतन्त्र-व्यवस्थाया आदर्शो विकृतिं मारम गमदिति राजतन्त्रदेशीयांस्तत्सबद्धान् व्यक्तिविशेषान् सावधानीकर्तुं सक्रियीकर्तुम् च,

(३) चिरादाकाङ्क्षिताया विश्वशान्तेः प्राप्तये सञ्चालयिष्यमाणस्य दीर्घकालिकस्य सार्वभौमकार्यक्रमस्य साहाय्याय विश्वस्याऽराजतान्त्रिकेषु देशेषु शक्तस्याऽदर्शस्य च राजतन्त्रस्य पुनः संस्थापनार्थम् सविवेकः परामर्शः क्रियताम् गम्भीरे मननचिन्तने चेति राष्ट्रसंघं, विश्वप्रबुद्धजनसमुदायं चाऽनुरोद्धुं राजतन्त्रस्यैतिहासिकमहिमगरिमवर्णनपुरःसरम् "राजतन्त्रं सदा जीव्यात्" इति पुस्तिकेयं मया प्राणीयत ।

कस्यचिदपि विधेः शासनतन्त्रस्य वा मूल्याङ्कनमैतिहासिकेषु सापेक्षे-ष्वाधारेष्वेव संभवतीत्युक्तास्तानेवाऽधारान् स्वीकृत्य विश्वस्य विद्वत्प्रकाण्डै राजदार्शनिकैः कृतज्ञैर्निष्पक्षैश्च भूत्वा राजतन्त्रं प्रति या संमानभावना प्रदर्शिता, सैषा लध्वी पुस्तिका तस्या एव संक्षिप्ता भावाभिव्यक्तिरस्ति । स्पष्टतया वक्तुं शक्यते—एषाऽभिव्यक्ती राजतन्त्रस्य गुणानुवादोऽस्ति, यथार्थवादोऽस्ति, नाऽर्थवादः ।

राजतन्त्रस्य गुणानुकीर्तनसन्दर्भे कथङ्कारं राजसंस्थोत्पन्ना, किं वा तस्याः प्रयोजनमिति सहजां जिज्ञासां समाधातुं महाभारतवर्णिताः कतिपया-स्तत्संबन्धिन्यः कथा★ भूमिकाया अपि भूमिकारूपेणाऽधस्तादाख्यायन्ते—

आधुनिकैरादिमसाम्यवादाभिधानेन व्यवहृता पुरा जातुचिदेवं

★नैव राज्यं न राजाऽऽसीन्न दण्डो न च दाण्डिकः
धर्मेणैव प्रजाः सर्वा रक्षन्ति स्म परस्परम्

व्यवस्थाऽऽसीद्यत्र न राजाऽऽसीन्न राज्यं न दण्डो न च दण्डाधिकारी । समाजे सर्वे जना मिथो धर्मभावेन मिलिताः संरक्षिता आसन् । परमेषा स्वर्गीया सुखशान्तिमयी स्थितिः समाजे न चिरं स्थातुमशक्नोत् । यतः कालक्रमेण, जनसंख्याऽचिन्तितमेवोत्तरोत्तरमवर्धत । उपभोग्यवस्तूनां नैयून्यमभावश्च जनसमुदायमक्लेशयताम् । स्थितिवशात् प्रतिजनं स्ववस्तुषु विशिष्टो रागः संग्रहबुद्धिश्चो (मोहः) त्पन्नौ । मोहवशाज्जनेषु ज्ञानं नष्टम् । ज्ञाननाशाद् धर्मभावनाया लोपो जातः । तेन च ते ते व्यक्तिविशेषा लोभविवशा जाताः । ततस्तेऽप्राप्तवस्तुप्राप्तये प्रयसितुमारभन्त । तेषु प्रयासप्राप्तवस्तुषु संग्रहबुद्धिमुत्पादयन् कामो जनेषूदियाय । सन्ना संग्रहबुद्ध्या (प्राप्तवस्तुषु) ममतां चोत्पादयन् रागोऽपि तदनूदपद्यत । तेनैव रागेण जनेषु कर्तव्याकर्तव्यस्य, गम्यागम्यस्य, वाच्यावाच्यस्य, भक्ष्याभक्ष्यस्य, सदोषस्य, निर्दोषस्य च विवेको नष्टः । तदैतस्याः स्थितेः समाधायको नियन्ता च कोऽपि जनः संस्था वा नो जातः । तदा जनानां स्थितिस्तथा शोचनीयाऽभवद्या महाभारतवर्णि-

---

पाल्यमानास्तथाऽन्योन्यं नरा धर्मेण भारत
दैन्यं परमुपाजग्मुस्ततनस्तान् मोह आविशत्
ते मोहवशमापन्ना मनुजा मनुजर्षभ
प्रतिपत्तिविमोहाच्च धर्मस्तेषामनीनशत्
नष्टायां प्रतिपत्तौ च मोहवश्या नरास्तदा
लोभस्य वशमापन्नाः सर्वे भरतसत्तम
अप्राप्तस्याऽभिमर्शं तु कुर्वन्तो मनुजास्तदा
कामो नामापरस्तत्र प्रत्यपद्यत वै प्रभो !
तांस्तु कामवशं प्राप्तान् रागो नामाऽभिसंस्पृशत्
रक्ताश्च नाऽभ्यजानन्त कार्याकार्ये युधिष्ठिर !
अगम्यागमनं चैव वाच्यावाच्यं तथैव च
भक्ष्याभक्ष्यं च राजेन्द्र ! दोषादोषं च नात्यजन्
विप्लुते नरलोकेऽस्मिन् ततो ब्रह्म ननाश ह
नाशाच्च ब्रह्मणो राजन् ! धर्मो नाशमथाऽगमत्
नष्टे ब्रह्मणि धर्मे च देवास्त्रासमथाऽगमन्
ते त्रस्ता नरशार्दूल ब्रह्माणं शरणं ययुः

तयाऽराजकस्थित्या साकल्येन संवदते स्म । साऽराजकस्थितिः कीदृश्यासीदित्यधोलिखितप्रकारेण भगवान् वादरायणो वर्णितवानस्ति—★

अराजके राष्ट्रे धर्मो नैतिकता च न जीवतः । जना मिथो युध्यन्ते, हिंसन्ति च । पापा जना अन्येषां धनान्यपहृत्याऽनन्दन्ति । किं नु क्षेमं भवेदराजके देशे पापाना (लुण्ठकानाम्) मपि ? । एकस्य पापिनो धनं द्वौ पापिनौ मिलित्वा तथैव द्वयोः पापिनोर्धनं बहवः पापिनः संभूय लुण्ठन्ति । अराजके देशे निर्बलःसन्नदासोऽपि दासीक्रियते । स्त्रियो बलादपह्रियन्ते । जना जले मीना इव, व्योमनि शकुन्ता इव मिथो हिंसन्ति । अगोपाः पशव इव च यत्र तत्र वल्गन्तो भ्रमयन्ति । बलिष्ठा निर्बलानां वसून्यसूंश्चाऽधिगृह्णन्ति । अराजकस्थितौ न कस्यचिद् भार्या रक्षिता भवति, धनानि सन्ततयो वा । कस्मिंश्चिदपि वस्तुनि क्वचिदपि कस्यचिदपि 'इदं ममे'ति नैव निर्धारणं स्थिरं भवति । संपद्विभववतामग्रे वधो बन्धनं क्लेशा एव वा केवलमापतन्ति । एष नृसमाजः केवलं दस्यूनामेव करपञ्जरे पतितो भवति । अकाल एव सर्वेषामन्तो भवति ।

★अराजकेषु राष्ट्रेषु धर्मो न व्यवतिष्ठते
परस्परं च खादन्ति सर्वथा धिगराजकम्
प्रीयते हि हरन्नेकः परवित्तमराजके
यदाऽस्य तद्हरन्त्यन्ये तदा राजानमिच्छति
पापा ह्यपि तदा क्षेमं न लभन्ते कदाचन
एकस्य हि द्वौ हरतो द्वयोश्च बहवोऽपरे
अदासः क्रियते दासो ह्रियन्ते च बलात् स्त्रियः
राजा चेन्न भवेल्लोके पृथिव्यां दण्डधारकः
जले मत्स्यानिवाभक्षन् दुर्बलं बलवत्तराः
यथा ह्यनुदके मत्स्या निराक्रन्दे विहङ्गमाः
विहरेयुर्यथाकामं विहिंसन्तः परस्परम्
एवमेव विना राज्ञा विनश्येयुरिमाः प्रजाः
अन्धे तमसि मज्जेयुरगोपाः पशवो यथा
हरेयुर्बलवन्तोऽपि दुर्बलानां परिग्रहान्
ममेदमिति लोकेऽस्मिन् न भवेत्स्वपरिग्रहः
न दारा न च पुत्रः स्यात् न धनं न परिग्रहः
क्लिश्नीयुरपि हिंस्युर्वा यदि राजा न पालयेत्
वधबन्धपरिक्लेशो नित्यमर्थवतां भवेत्
अन्ताश्चाऽकाल एव स्युर्लोकोऽयं दस्युसाद्भवेत्

यथोपरि वर्णितस्तादृश एवाऽराजकस्थितेः शोचनीयो दुःखक्लेशक्रन्दनमयः परिणामस्तदातनेन नृसमाजेन निर्विष्टः। तेन जनास्त्राहि त्राहीति क्रन्दन्तो भगवन्तं विरिञ्चिमुपगत्यैतद् दुरन्तं दुःखकष्टजातं शशंसुस्तदपनेतुमुपायं च पप्रच्छुः। ततो विरिञ्चिस्तान्दण्डनीतिमुपदिदेश। यस्याः कार्यान्वियनाय राज्य-संस्थायाश्चोत्पत्तिर्जातेति।

महाभारत एवाऽपराऽऽख्यायिकाऽस्ति—

जातुचित्तथैवाऽराजकस्थितेः सीमातीतं दुःखकष्टजातं निर्विशन्तोऽसहाया विश्वस्य जना मिथः समवेत्य, परामृश्यैवं स्वहिताय निरणयन्—"इतः प्रभृति यो विनाकारणमपरानुपालभते, तर्जयति, क्लिश्नाति, परेषां

---

*अराजकाः प्रजाः पूर्वं विनेशुरिति नः श्रुतम्
परस्परं भक्षयन्तो मत्स्या इव जले कृशान्
समेत्य तास्ततश्चक्रुः समयानिति नः श्रुतम्—
"वाक्शूरो दण्डपुरुषो यश्च स्यात्पारदारिकः
यश्च नः समयं भिन्द्यात् त्याज्या नस्तादृशा इति"
तास्तथा समयं कृत्वा समयेनाऽवतस्थिरे
सहितास्तास्तदा जग्मुरसुखार्ताः पितामहम्—
"अनीश्वरा विनश्यामो भगवन्! ईश्वरं दिश
यं पूजयेम संभूय यश्च नः प्रतिपालयेत्"
ताभ्यो मनुं व्यादिदेश, मनुर्नाऽभिननन्द ताः—
"बिभेमि कर्मणः पापात् राज्यं हि भृशदुष्करम्
विशेषतो मनुष्येषु मिथ्यावृत्तेषु नित्यदा"
तमब्रुवन् प्रजा—"मा भैर्विधास्यामो धनं तव
पशूनामथ पञ्चाशहिरण्यस्य तथैव च
धान्यस्य दशमं भागं दास्यामः कोशवर्धनम्
मुख्येन शस्त्रपत्रेण ये मनुष्याः प्रधानतः
भवन्तं तेऽनुयास्यन्ति महेन्द्रमिव देवताः
यं च धर्मं चरिष्यन्ति प्रजाः राज्ञा सुरक्षिताः
चतुर्थं तस्य धर्मस्य त्वत्संस्थं नो भविष्यति
तेन धर्मेण महता सुखं लब्धेन भावितः
पाह्यस्मान् सर्वतो राजन्! देवानिव शतक्रतुः

दारान्धनानि वाऽपहरति, सोऽस्माभिः सर्वैः संहत्य समाजाद्बहिष्कर्तव्यः। तथा सोऽपि दण्डनीयो य एतं नियममवहेलयत्यतिचरति वा।"

परं नैष तेषां नियमः कार्ये पर्यणमत्। तेन समस्या यथावदेव स्थिता। समाधानं नो जातम्। अतो दुःखकष्टमुक्तेरन्यमुपायमपश्यन्तस्ते संभूयोपगम्य भगवन्तं ब्रह्माणं न्यवेदयन्— "प्रभो, नियुज्यतामस्मत्कृते कश्चन समर्थः स्वामी, योऽस्मान् संरक्षेत् पालयेच्च। अन्यथा वयमुत्तरोत्तरं विपन्ना भवेम।"

तदाकर्ण्य प्रास्तावीत् परमेष्ठी मनुं राजत्वाय। परं तं प्रस्तावं मनुर्नैव स्वीचक्रे, प्रत्युवाच च तं धातारम्— "प्रभो, अहं बिभेमि पापकर्मणः। निसर्गतो मिथ्यावृत्तित्वाज्जनानां दुःसमाधेयो भवति राज्यप्रपञ्चः। अतो नाऽहमेतं भारं विवक्ष्यामि।"

तदवगत्य जनाः सविनयं मनुं न्यवेदयन्— "मा स्म भैषीत् स्तोकमपि भवान्। धर्मेण प्रजाः शासति नृपे कुतः पापप्रसक्तिः? राज्यसंचालनाय वयमेव भवदर्थकोषं संवर्धयिष्यामः पशु-सुवर्ण-धान्य-करनिर्यातनेन। भवतः सुरक्षायै परितः सशस्त्रान् प्रहरिणो वयं नियोक्ष्यामः। अस्मच्चीर्णानां धर्मकर्मणां चतुर्थांशमपि भवत्कृते उत्स्रक्ष्यामः। केवलमेतन्निष्क्रयाय भवनिन्द्रो देवानिवाऽस्मान् सुरक्षयाऽन्यैश्चाऽऽवश्यकैः सौविध्यैर्योजयतु। जनानां तेन सविनयेन निवेदनेन मनोर्हृदयं परिववृते। तेन स्वीचक्रे स तेषां प्रस्तावम्। तदेतेषामेव समयानुसारं क्षितितले प्रथमो राजा मनुः स्वायम्भुवो बभूवेति।

तथैवाऽपराऽऽख्यायिकाऽप्यस्ति—

जातु तथैवाऽराजकस्थितौ जनसमाजे सर्वतो दुःखेनाऽसुरक्षया च पेपीड्यमाने, दोदूयमाने च भगवान् विधाता तस्य त्राणाय क्षेमाय च क्षितितले प्रथमं राजानं पृथुं न्ययुङ्क्त। राजपदप्राप्त्युत्तरं राज्यकार्यप्रारम्भाच्च प्राक् क्षितीशः पृथू राज्यसंचालननीतिनिर्देशनाय ऋषीनन्ववृणत्। ते च तमेवमुपादिशन्卐

"कामं क्रोधं लोभं दर्पं च सर्वं विहाय, स्वार्थान्नविगणय्य, स्वस्य प्रियेऽप्रिये वा प्राणिमात्रे च समो भूत्वा प्रजाः शाधि। जनसमाजं क्लेशयन्तं जनं पितरं

卐 'प्रियाप्रिये परित्यज्य समः सर्वेषु जन्तुषु
कामं क्रोधं च लोभं च मानं चोत्सृज्य दूरतः
यश्च धर्मात्प्रविचलेत् लोके कश्चन मानवः
निग्राह्यस्ते स्वबाहुभ्यां शश्वद्धर्ममवेक्षता

सन्तमपि दण्डयेथाः । एवं सर्वत्र निष्पक्षभावं श्रयेथाः । स्वकर्तव्येऽनिशमस्खलितः सावधानश्च सन् राजपदमर्यादां पालयेथाः इति" ।

तेषां निर्देशनमनु राजाः पृथुः प्रतिजज्ञे – "तत्सर्वमेवाऽहं करिष्ये यद् भवन्तो मह्यं सारवत् कर्तव्यनिर्देशनं प्रत्तवन्तः। माऽस्तु लेशतोऽपि तत्राऽशङ्का । किञ्च–सर्वाः स्वस्य प्रजा विपद्भ्योऽभिरक्षिष्यामि । ताः स्वस्वधर्मपथे प्रवर्तयिष्यामि च । दुष्टान् शान्तिद्रोहिणो विनीय राज्येऽनुशासनं प्रतिष्ठापयिष्यामि । प्रयस्य, कृषिफलानि संवर्ध्य सर्वाः प्रजाः ससुखाः समृद्धाश्च करिष्यामि । सर्वेषु जनेषु निष्पक्षः, स्वस्य प्रियेऽप्रिये वा समश्च भविष्यामि इत्यादि ।

एवं यथा प्रतिज्ञातम् तथा तेन सर्वं पारितं चेत्यैतिह्यं स्तौतितमामेनं राजानं पृथुम् । एवमुपर्युल्लिखिता इव जैनबौद्धग्रन्थेष्वपि राज्योत्पत्तिविषये विभिन्नाः कथा उपलभ्यन्ते । परं सर्वास्ता अपि तामेवाऽराजकस्थितिजां व्यापिकां दुःखक्लेशपूर्णामव्यवस्थामशान्तिं जनाक्रन्दनमेव च राज्योत्पत्तेः पृष्ठभूमिमवधारयन्ति । नाऽत्र कासाञ्चिदपि तासां कथानां काचन विप्रतिपत्तिः । एतद्विषयक आख्यानोपाख्यानगतो विभेदस्तु कल्पभेदजन्यो भवेदिति न तेन ऋषिवर्णितानां तासां कथानां काल्पनिकत्वमसत्यत्वं च संभाव्यते ।

अत्र भवति प्रासङ्गिकः प्रश्नः– उपर्युक्तोपाख्यानानुसारमत्यन्तावश्यकतयोपयोगितावादिना दृष्टिकोणेन च तदा प्रतिष्ठापितायाः श्रद्धेयाया राजतन्त्रव्यवस्थाया महिमा गरिमाऽऽवश्यकता वा वर्तमानयुगे कियानस्तीति । तदुत्तरमहं दृढीभूयैवं ददामि – "विश्वसमस्या पुरा राज्योत्पत्तिसमयादप्यद्य भयावहाऽस्ति । यथाऽऽदिमो राजा स्वायम्भुवः प्रावोचत् – "सर्वेषां जनानां स्वभावतो मिथ्यावृत्तित्वाद्राज्यशासनं सुदुष्करमस्तीति ।" सत्यमेतत् । मनोः कथनानुसारं जना मिथ्यावृत्तयो भवन्त्येव । तेन दृष्टिकोणेन पुराकालिकस्याऽजागरितस्य सरलात्मनो जनसमूहस्य शासनादद्यश्वीनस्य स्वार्थप्रेरितस्य चेतनाप्रतिभासंपन्नस्य च जागरितस्य कुटिलात्मनो जनसमूहस्य शासनमवश्यमेव सुदुष्करं भवेत् । तेनाऽदिमयुगादप्यद्यतने युगे राजतन्त्रस्य न केवलमावश्यकतैवाऽपित्वनिवार्यतैवाऽस्ति । अतो राजतन्त्रस्य महिम्नो, गरिम्ण आवश्यकतायाश्च वृद्धिः स्वाभाविक्येवाऽस्ति ।

अन्यः प्रश्नः– अद्यत्वे विश्वस्य प्रायो भूभागेषु व्यवस्था अन्यान्या एव प्रचलन्ति, एवं स्थितौ राजतन्त्रस्य महिमगरिमवर्णनपरस्य वातावरणस्य सर्जनमद्य कुतः सञ्जातम् ?

अत्रोत्तरम् – तथा वातावरणस्य सर्जनं त्वग्रे गत्वोत्तरोत्तरं बोभूयिष्यते। परमिदानीं तु राजतन्त्रस्य महिमगरिम्णोः पुण्यस्मरणमेव केवलं भवदस्ति ममैवाऽन्तःकरणतो विवेकतश्च। परमहं बद्धपरिकरश्चाऽस्मि शक्तमादर्शं चैतद्राजतन्त्रं ◈स्मरणसीमायामप्रतिबध्याऽविश्वं प्रचारयितुं, प्रसारयितुं प्रतिष्ठापयितुं च। किं निमित्तैषा कटिबद्धता? अत्र विभिन्नानि कारणानि सन्ति – (१) राष्ट्रिया स्थितिः (२) अस्मद्राष्ट्रसदृशानां विश्वस्याऽन्येषामविकसितानां राष्ट्राणां तथा विकसितानां च राष्ट्राणां स्थितिः, (३) रागद्वेषयुद्धसंघर्षमयी वर्तमानाऽन्तर्राष्ट्रियस्थितिः (४) चिरादाकांक्षिताया विश्वप्रार्थिताया विश्वशान्तेरनिवार्याऽऽवश्यकता च।

◈कीदृशं भवति शक्तमादर्शं राजतन्त्रम्?

'शक्त' शब्दस्य तात्पर्यम्–

नो युक्तमाचरितं तेन राज्ञा यो राष्ट्रप्रत्तं सौविध्यजातमुपभुनक्ति, स्वयं च निष्क्रियः सन् युगं व्यपदिश्य सर्वं राज्यकार्यजातम् सर्वोच्चविधायिकाया अधिकारे त्यजति। सर्वोच्चविधायिकायाम् कतमद् दलम् कतमो वा संप्रदाय ईष्टे,? दलप्रमुखः कोऽस्ति? यस्मै कस्मैचन मनुष्याय स्वप्रजानां भाग्यनिर्माणकार्यं न समर्पणीयम्। यतः परापूर्वकालतः स्वपूर्वपुरुषैः संवर्धिताः स्वप्रजाः यथा राजा स्निह्यति, न तथाऽपरः कश्चित्। तथा चाऽह मनुः– 'अपवाह्योत्तरदायित्वं राज्ञा न स्थातव्यम्। तेन न केवलं राज्ञा राजपदमधिकुर्वताऽपितु नेत्रा शक्तेन पथिप्रवर्तकेन, सक्रियेण च भाव्यम्। अन्यथा प्रजा मज्जतीति। तथा महाभारतेऽप्युक्तम्—सराजकर्मचारिणि नृपे पश्यत्येव यदि दुष्टा, मिथ्यावृत्तयो दस्यवः प्रजाः क्लिश्नन्ति, आर्तचित्कारविवशाः कुर्वन्ति, तदा स राजा जीवन्नपि मृतो मन्यते इति। यथा—

यदि न स्यान्नरपतिः सम्यङ्नेता ततः प्रजा
अकर्णधारा जलधौ विप्लवेतेह नौरिव – मनुः
विक्रोशन्त्यो यस्य राष्ट्रात् ह्रियन्ते दस्युभिः प्रजाः
संपश्यतः सभृत्यस्य मृतः स न तु जीवति –महाभारत

तेन दुष्टदमनाय, शिष्टसंरक्षणाय, निग्रहानुग्रहौ विधायाऽनुशासनस्य प्रतिष्ठापनाय च कल्पते यः स राजा शक्तः, तद्राजतन्त्रं शक्तम् इति विशिष्यते।

आदर्शशब्दस्य तात्पर्यम् –

राज्ञो राजनीतिः परेषां धर्षणाय, अवधीरणाय न स्वप्रजानाम्।

(१) राष्ट्रिय स्थितौ राजतन्त्रस्याऽवश्यकता

यथेटलीदेशस्य राजदार्शनिको मैकियावलीमहोदयः स्वसमये तन्निवासस्थानभूतस्य फ्लोरेन्स नगरस्य तथाकथितान् सिद्धान्तहीनानान्तरिकाऽशान्तिकारिणो दुष्टसमूहान् याथार्थ्येन परिचित्य तादृशाणां दमनाय शक्तिशालिनो राजतन्त्रस्याऽवश्यकतां स्वीचक्रे, तथैवाऽनिवार्यतया लोककल्याणकारिणा शक्तेनाऽऽदर्शेण च राजतन्त्रेणैव समाधेया अस्मद्देशस्य निम्नलिखिता वर्तमाना राजनीतिकाः सामाजिका आर्थिका धार्मिकाश्च सर्वेऽपि गतिविधयः सांप्रतं मां मैकियावलीकृत्य चिन्तनविवशं कुर्वन्तः सन्ति, यानहं राष्ट्रियस्थितेः कारणानि मन्ये ।

प्रजासु तु पितृभावो हि राज्ञो राजत्वम् । सैनिकानां, प्रहरिणां, कोषस्य च बलेन राजा कस्मैचित् समयाय प्रजास्त्रासयितुं, परतः स्वं स्तावयितुं च शक्नोति, परम् स्वल्पेनैव कालेनेजिहांसस्तं परिहासपथं प्रापयति । तेन नैष पन्था क्षेमङ्करो भवति नृपाणाम् । वरम् यः खलु राजा राजतन्त्रं वा प्रजाः पुत्रीयते, स्निह्यति, ममत्वेन योजयति, तेन मार्गो गृहीतोऽजरामरत्वस्य । तेन युक्तमुक्तमाचार्येण कौटिल्येन –प्रजासुखे सुखं राज्ञः प्रजानां च हिते हितम् इति ।

किञ्च – प्राचीनैः प्रातःस्मरणीयै राजर्षिभिर्न केवलं विधिप्रपञ्चेनाऽपितु स्नेहेनैव सममत्वेन प्रजानां शासनं विहितम् । स एव हि यथार्थतो राजधर्मोऽपि । यथाऽऽह स्मृतिः–

'अर्थशास्त्रात्तु बलवत् धर्मशास्त्रमिति स्थितिः

तेनाऽऽदर्शेण राजतन्त्रेण प्रजातन्त्रस्य सा परा काष्ठाऽवबोध्यते, यत्र प्राणवल्लभा राज्ञी (सीता) सुखं त्यज्यते, परं नैव लोकसंमतिरास्कन्द्यते । तत्रैतत् सिद्धान्ततः स्वीक्रियते – प्रजानां संरक्षणं पोषणमेव राज्ञो यज्ञः, तपः, पुरुषार्थो वा भवतीति । एतावता सैव निष्कर्षो भवति–प्रजानां स्वतन्त्रतारक्षार्थं, सुखसमृद्धये, राष्ट्रियस्वाभिमानप्रतिष्ठापनाय च यत्नचिन्ताशीलं हि राजतन्त्रम् राजानं वा बोधयितुमादर्शशब्दो विशेषणत्वेन प्रयुक्त इति ।

राजतन्त्रशब्दस्य तात्पर्यम्–

राष्ट्रजनाः स्वप्राचीनसंस्कृतिविध्यनुसारम् यम् राजसिंहासने प्रतिष्ठाप्याऽभिषिञ्चन्ति, दण्डाधिकारेण योजयन्ति, य उत्तराधिकारपरम्परा निर्वहति, तादृशादसाधारणव्यक्तित्ववतो नृपान्मंत्रिसचिवविधायिकादिपरामर्शेण जनानां स्वतन्त्रतायै सुखसमृद्धये राष्ट्रियस्वाभिमानसंरक्षणाय च संचाल्यमाना स्वच्छा व्यवस्था राजतन्त्रशब्देनाऽवबोध्यते ।

यतः "अस्माकं देशः पुराकालाद्बहुभिर्जात्युपजातिभिः कृतनिवास ऐतिहासिकः स्वतन्त्रो राजतान्त्रिको देशोऽस्ति । ऊनविंशायां विंशायां वा शताब्द्यां विश्वस्याऽन्यदेशैः कृताभिर्विभिन्नक्षेत्राणामुन्नतितितिभिस्तात्कालिक-शासनविशेषकारणतो वञ्चितस्याऽस्याऽप्यस्मद्देशस्य स्थितिर्न कदाचिदपि शान्तिसुरक्षाया राष्ट्रियस्वतन्त्रतायाश्च वातावरणेन विनाभूता समजायत । देशस्यान्तः सप्तनवत्युत्तरैकोनविंशे वैक्रमाब्दे सर्वप्रथमं श्री टंकप्रसादगणेशमान–सिंहादीनां प्रजापरिषदो विद्रोहात् तथा चतुरुत्तरद्विसहस्रतमे वैक्रमाब्दे 'जयतु-संस्कृतम्' आन्दोलनात् च शीर्णजनविश्वासमूले, नेपलीकंग्रेसस्य प्राणसंर-क्षकस्य श्रीसुवर्णशमशेरादेः प्रजातान्त्रिकसंघटनस्य महावातेन बलवत्प्रकम्पिते राष्ट्रपितुस्त्रिभुवनस्य नेतृत्ववज्रपातेन च भूमिसाद्भूते सति राणाशासने यद्यपि प्रजातन्त्रस्योदयो जातस्तथापि सप्तदशोत्तरद्विसहस्रतमं वैक्रमाब्दं यावद् राजनीतिकदलानां मिथः सैद्धान्तिकेन विवादेन देशो न विकासपथं ग्रहीतुम-पारयत् । तत्पश्चाद् राष्ट्रमहत्वज्ञानस्य, विकासपथिग्रहणस्य च सविशष वातावरणे समुत्पन्ने सत्यपि राष्ट्रनायकस्य श्रीपञ्चकशोभिनो राज्ञो महेन्द्रस्या-ऽकस्मिकस्वर्गारोहणेन न केवलं तस्य वातावरणस्य विच्छेदो जातः, अपि तु राष्ट्रस्य प्रत्येकेष्वङ्गेषु मन्दतायाः शिथिलतायाः, प्रत्येकेषु क्षेत्रेषु विवादस्य तन्मूल-कानां विविधानामशान्तिस्रोतसामपि समुद्भवो जातः । दृष्टरूपे एव "अनेकान्युत्तेजकानि जातीयसंघटनानीदानीं देशे सक्रियाणि सन्ति । चर्चाऽस्ति—समस्थलमुक्तिसंघटन (तराइमुक्तिमोर्चा) मन्तरान्तः कार्यं कुर्वदस्तीति । अनेन देशस्याऽखण्डतायामेवाऽघातस्य, पुनः प्राचीनलघुलघुराज्य-समूह (बाईसी चौबीसी राज्य) प्रदुर्भावस्य च पूर्वलक्षणानि परितो दृश्यमा-नानि सन्ति । वयस्कमताधिकारस्याऽधारे निर्वाचितं राष्ट्रियपञ्चायतं प्राप्त-चरमपि प्रजातन्त्राधिकारं दुरुपयुञ्जानं मण्डलसभा (जिल्ला सभा) विघटनाधि-कारमपि मंत्रिपरिषदेऽददात् । राष्ट्रियपंचायतं पूर्वेऽह्नि सर्वसंमत्या यं प्रधान-मंत्रिणं वृणोति पुनरपरेऽह्न्येव तस्यैव प्रधानमंत्रिणो विरोधेऽविश्वासप्रस्तावमानीय स्वस्य राजनीतिकचेतनाया अत्यन्ताभावं विज्ञापयति । सत्तारूढेषु व्यक्ति-विशेषेषूच्चपदस्थेषु कर्मचारिषु चाऽर्थसंग्रहार्थके भ्रष्टाचारे प्रतिस्पर्धाऽस्ति । तथैषा परिपाटी निम्नस्थानकर्मचारिणामप्यनुकरणीयतां गताऽस्ति । प्रजातन्त्रे सैद्धान्तिको विरोधः कीदृशो भवतीति नास्ति ज्ञानमल्पमपि केषाञ्चिदप्याधुनिक-राजनीतिकपदव्यपदेश्यानाम् । आत्मानं विरोधिनं मन्यमानो राजनीतिकपक्षोऽ पि तस्मिन्नेव भ्रष्टाचारे लालायितोऽसहिष्णुभूतः सन् केवलं विरोधाय विरोधं कर्तुं नैव त्रपते । प्रशासनं न केवलं शिथिलमपितु निष्क्रियमेवाऽस्ति । राज्ये

पात्रापात्रविवेकोऽर्हणीयो निग्रहानुग्रहविधिश्च शून्यप्रायौ स्तः। देशो वैदेशिकऋणभारेण निष्पीडितो दिनानुदिनं पतन्नस्ति। देशे नास्ति कश्चिद् विश्वसनीय आर्थिकः कार्यक्रमः। जनानामार्थिकी स्थितिरुत्तरोत्तरं सातिशयं शोचनीया करुणा चाऽस्ति। पवित्रेषु धार्मिकनैतिकक्षेत्रेष्वपि तत्संबद्धेभ्यः प्रवक्तृभ्यः प्रचारकेभ्यश्च जाता ये लज्जावहा व्यतिक्रमाः श्रुतिपथमागताः, तद्विषयऽसन्तुष्टस्य विद्वद्वर्गस्य संयुक्त आक्रोशो ऽद्यत्वे भूयो भूयः श्रूयमाणोऽस्ति। हिन्दूराज्ये भ्रूणहत्यां वैधीकर्तुं परामर्शः प्रयासाश्च क्रियमाणाः वार्तापत्रतो ज्ञायन्ते। आपणभोजनालयेषु गोमांसविक्रयकुप्रथायाः प्रारम्भात्तस्य विरोधे स्वयं मयैव सक्रियताऽद्यत्वे निर्व्यूढाऽस्ति। एवं राज्यस्य सकलेष्वङ्गप्रत्यङ्गेषु व्यवस्था अस्तव्यस्ताः सन्ति। परराष्ट्रनीतिश्च ततोऽप्यधिकमसन्तुलिताऽस्ति। राजप्रासादमन्तरेण नाऽन्यः कश्चिद् देशस्य जनतायाश्च कृते चिन्तां कुरुते।"

अस्यां स्थितावस्मद्‌देशस्य कृते कीदृशो व्यवस्थाया आवश्यकताऽस्ति? कृषकाणाम्, कर्मकराणाम्, तेष्वपि नगरवास्तव्यानां कर्मकराणा (मजदूर) मेव केवलं हितं चिन्तयतोऽथवा मानवीयस्यैवाऽधिकारस्य मूल्यमवहेलयतो व्यवस्थाविशेषस्याऽनुसरणेनाऽस्माकं प्रजातान्त्रिकं राष्ट्रियलक्ष्यं नैव पूर्णं भवति। अस्मत्कृते तु सर्वप्रथमं राष्ट्रमेव खण्डितं, क्षतविक्षतमशान्तिग्रस्तं च विधित्सतां राष्ट्रस्याऽन्तरिकराजनीतिकशत्रूणामार्थिकभ्रष्टाचारव्यसनिनां च निर्ममं दमनं कृत्वा, राष्ट्रियतां संरक्ष्य, सर्वेषां वर्णानां हितमात्मविकासं च साधयन्त्याः, प्रजातान्त्रिकमार्गेण शोषणविहीनं स्वस्थं समृद्धं स्वतन्त्रं च राष्ट्रं निर्मातुं समर्थायाः शक्तायाः आदर्शगुणवत्याश्च व्यवस्थाया आवश्यकताऽस्ति। तादृशी व्यवस्था शक्ताऽऽदर्शभूता राजतन्त्रव्यवस्थैव भवितुं शक्नोति। नाऽन्या काचन व्यवस्था।

(२) (क) विश्वस्याऽस्मद्राष्ट्रसदृशानामविकसितानां राष्ट्राणां स्थितावपि शक्ताया आदर्शराजतन्त्रव्यवस्थाया एवाऽवश्यकता–

उपर्युक्तायाः शक्तादर्शराजतन्त्रव्यवस्थाया न केवलमस्मद्राष्ट्रस्यैव कृतेऽपितु विश्वस्याऽन्येषामस्मद्राष्ट्रसदृशानामविकसितानां राष्ट्राणां कृतेऽपि तथैवाऽवश्यकताऽस्ति। यतोऽस्माकं सर्वेषामेवाऽविकसितानां राष्ट्राणां समस्याः समाना एव सन्ति। अस्माकं सर्वसमानानि चत्वार्यभियाचनानि सन्ति— (१) नागरिकराजनीतिकस्वतन्त्रता (२) आर्थिकसमानता (३) शान्ति-

सुरक्षा (४) आध्यात्मिकविकासः। एतेषु शान्तिसुरक्षायाः कृते द्रढीयसोऽनुशासनस्याऽवश्यकता ऽस्ति। अविकसितेऽप्रबुद्धे देशे दृढमनुशासनं नागरिक-राजनीतिकाधिकारी च नैव सह स्थातुं शक्नुवन्ति। नागरिकराजनीतिक-स्वतन्त्रतया सहार्ऽथिकसमानतायाः साधकः कार्यक्रमोऽपि नैव सह सञ्चालयितुं शक्यते। यतः संवैधानिकस्वतन्त्रतायामेव पर्याप्तं सन्तोषमनुभवतां तथा तयैव समृद्धिपथमवाधितम् प्राप्तवतां धनपतीनाम् तथ ऽऽर्थिकसमानतां विना प्राणितुमशक्नुवतां तामेव जीवनस्योपलब्धिं, सिद्धान्तस्य परां काष्ठां च स्मरतां निम्नार्थिक-वर्गाणां मध्ये नैव भवति जातुचित् सामञ्जस्यं नाम। एतादृशीः सर्वाः समस्याः समाधाय शासनप्रशासने कर्तुमितरा उपव्यवस्था नैव क्षमा भवन्ति। वर्तमान-विश्वस्याऽराजतन्त्राणि राष्ट्राण्येव ममाऽस्य विचारस्योदाहरणदृष्टान्तरूपाणि सन्ति। तासूपव्यवस्थासु (राजतन्त्रेतरव्यवस्थासु) शासनेन वर्गविशेषान् निष्पीडन्य, संक्लेश्य राज्योत्पत्तेस्तात्पर्यमेवोपेक्षितं विस्मृतमिव चोपलक्ष्यते। नच दृश्यते समन्वयस्य सामञ्जस्य वा सिद्धान्तश्च समादृतः। न्यायोचितां समानतां स्थिरीकृत्य, यथोचितां राजनीतिकीम् स्वतन्त्रताम् दत्वा, दृढ-मनुशासनमुपयुज्य, सर्ववर्गेषु समन्वयं च संस्थाप्य संयुक्ताः समस्याः समाधातुं शक्तमादर्शं राजतन्त्रमेव क्षमं भवति। अतोऽस्मद्राष्ट्रस्यैवाऽविकसितानां विश्वस्याऽन्येषां राष्ट्राणाम् कृतेऽपि राजतन्त्रस्यैवाऽवश्यकताऽस्ति। तेनैतद-पन्होतुं न शक्यते।

(२) (ख) किञ्च– विश्वस्य वर्तमानानां विकसितानां राष्ट्राणां कृतेऽपि शक्तस्यादर्शस्य राजतन्त्रस्यैवाऽवश्य-कताऽस्ति–

न केवलमुपर्युक्तानां विश्वस्याऽविकसितानां राष्ट्राणामेव कृतेऽपितु विकसितानां शक्तानां समृद्धानां च वर्तमानानां राष्ट्राणां कृतेऽपि शक्तस्यादर्शस्य राजतन्त्रस्यैवावश्यकताऽस्ति। यतः "कस्याऽपि न स्थायि भवेद्गुरुत्वम्" – उत्थानमनु पतनम्, उन्नतिमन्ववनतिरेष एव हि सार्वभौमो नैसर्गिको नियमः। कस्य वोन्नतिगर्वः स्थायित्वाय कल्पते ? उत्थानोन्नत्योरुदर एव पतनावनत्यो-र्बीजारोपणं सञ्जातचरं भवति। विभिन्नासु भङ्गीषु प्राचीनैश्चिन्तकैः ऋषिमहर्षि-भिरर्वाचीनैश्चिन्तकैर्मार्क्सप्रभृतिभिश्च व्यक्तचर एवैष प्राकृतिको नियम इत्यत्रा-ऽस्तीतिहास एव साक्षी—जातुचिद् भारतवर्षमद्यतनाऽमेरिकारूसादिसमृद्धशक्त-देशेभ्योऽपि शक्तं समृद्धमुन्नतं विश्वप्रसिद्धं चाऽसीत्। कदाचन रोमसाम्राज्यस्य तथैव वर्णनातीतं चाकचक्यमासीत्। समीपस्थैव निदर्शनं कुर्मः—गतद्वितीय-

महासमरात्प्राक, अथवा ततोऽपि पूर्वममेरिकास्वातन्त्र्यसंग्रामपराजयात्प्राग्वेलाप्रतस्य स्थितिरन्यैऽवाऽऽसीत् । तेनाऽद्यतनैरुन्नतसमृद्धशक्तैरपि राष्ट्रैः सस्मृद्धिं स्वीयमसीमं राष्ट्रियविकासं संरक्षितुमुत्तरोत्तरमुन्नतिप्रगतिक्रमे नैरन्तर्यं संस्थापयितुमार्थिकनिश्चिन्ततताप्रयुक्ताद् 'गेंकल्चर' (यथाऽनन्दो भवति तथा कार्यम्) सदृशात्प्रचलितात्संभावित च्च दुर्व्यसनसमूहद्राष्ट्रस्य भाविनां कर्णधाराणां नवयुवकानां चरित्रं संरक्षितुं च (यदभावेऽन्ततो गत्वा राष्ट्रियं पतनमवश्यं भाव्यस्ति) परमावश्यकत्वेन सिसृक्षितायाः शाश्वतशान्तिमयस्य वातावरणस्य स्थिरतायास्तदर्थकस्य च दृढानुशासनस्याऽविचालनीयस्य शक्तशासनस्य च कृतेऽपि शक्तस्याऽदर्शस्य राजतन्त्रस्यैवाऽश्रयः कर्तव्यो भवति ।

(३) वर्तमानाया रागद्वेषयुद्धसंघर्षमय्या अन्तर्राष्ट्रियस्थित्याः कृतेऽपि शक्ताया आदर्शराजतन्त्रपद्धत्या एवाऽवश्यकताऽस्ति—

अद्य मिथो विश्वस्य राष्ट्रेषु वा तेषां राष्ट्रणामपि प्रान्तप्रान्तेषु जनसम्दायेषु वा मिथो निम्नलिखितप्रकारका या रागद्वेषवैरसंघर्षहिंसाप्रतिहिंसानां दुःखदायिन्यो घटना घटिताः सन्ति, ताः (कर्व्यः) विश्वस्य मानवसमुदायेषु वर्धमाना युगचेतनाः, तथाऽद्ययावन्मानवजात्यर्जितानि साऽनुभूतीनि ज्ञानचिन्तनानि, प्रत्येकं राष्ट्राणां सर्वोपरिस्थानानां बौद्धिकानां साधिकाराणां च जनानां निकायान्, विधायकतत्वानि, विशेषतो विश्वसमस्यानां समाधानाय, सार्वभौमशान्तिस्थापनाय च प्रतिष्ठापितं विश्वमानवश केन्द्रम् संयुक्तराष्ट्रसंघमेव भूयोभूयः परिहसन्त्यः सन्ति । अवाञ्छनीयानां तासां घटनानामुत्पत्तिस्तन्नैरन्तर्यं च मिथो राष्ट्रराष्ट्रेषु संयुक्तराष्ट्रसंघस्याऽक्षमतायास्तथा राष्ट्राभ्यन्तरेषु तत्रत्यशासनसत्ताया अक्षमतायाश्चोत्पन्ने स्तः । एते द्वे पाठकाः स्वयं विविच्य पृथक्कतुं शक्ष्यन्ति –

(१) चिरादसमाहिता काश्मीरसमस्या, पश्चादुद्भूतो भारतचीनयोः सीमाविवादश्चाऽद्ययावद्यथावदेव स्तः ।

(२) भारतपाकिस्तानयोर्वाग्युद्धं प्रचलदेवाऽस्ति, तत् कस्मिंश्चिदपि समये शस्त्रयुद्धे परिणमितुं शक्नोति ।

(३) चीनरूसयोःसीमाविवादनिमित्तकं मनोमालिन्यं मिथो द्वेषश्च वर्धमाने स्तः । उपविदेशमंत्रिणां वार्तालापतोऽपि नैव जातम् किञ्चित्समाधानम् ।

(४) जहीरशाहस्य पतनानन्तरमफगानिस्ताने द्वयो राष्ट्रपत्योर्वधो जातः । वैदेशिकसैनिकप्रत्यावर्तनविषयकं राष्ट्रसंघीयं प्रस्तावं रूसदेशो लत्तयाऽऽस्कन्दन्नस्ति । देशाभ्यन्तरे विद्रोहः प्रचलन्नस्त्येव ।

(५) श्रीलङ्कायां बौद्धिष्ठसिञ्जालीसमूहस्य, भारतीयमूलस्याऽल्पसंख्यकस्य तामिलसमूहस्य च मध्ये प्रचलतः सांप्रदायिकविरोधस्याऽवरोधो नियन्त्रणशक्तिव ह्यो भवन्नस्ति । इतो राष्ट्रमण्डलीयसंमेलन। समये (प्रधानमंत्रिपदभाजः) इन्दिरागान्धेः राष्ट्रपतेजयवर्धनस्य चैतत्संबन्धिनो वार्तालापस्य परिणामः प्रतीक्षित आसीत् तदा ।

(६) ईराने शाहस्य पतनमनु सत्तारूढो धार्मिको नेता रोहल्ला खुमैनिः परःसहस्रान् जनान् मृत्युदण्डेन योजयामास । तथात्वेऽपि धर्मान्धः सर्वकारो मुजाहिद्दीनसंघटनस्य विद्रोहिणो दमयितुं नाऽस्ति सफलः। तत्र देशव्यापि भयम्, आतङ्कः, अशान्तिश्च सन्त्येव ।

(७) अरबराष्ट्राणामान्तरिको भेदो मनोमालिन्यं चोत्तरोत्तरं वर्धमाने स्तः । अरबराष्ट्रेजरायलयोर्वैरस्य युद्धसंभावनायाश्च स्थितिर्यथावदेवाऽस्ति ।

(८) प्यालेस्टाइनीया समस्या यथावदेवाऽस्ति । स्वतन्त्रराज्यसंस्थापनसंबन्धिनीं महतीमाकाङ्क्षां बिभ्रद् यासीर अराफतो (आकांक्षापूर्तिस्तु परत एवाऽस्ताम्) लेबनानं त्यक्त्वा स्वप्रधानकार्यालयमेव लिबियाराजधान्यां त्रिपोल्यां नेतुं विवशो जातः ।

(९) अस्मिन्नेव युद्धसंघर्षसन्दर्भे लेबनाने शान्तिसंस्थापनार्थं युद्धविरामनिरीक्षणाय नियुक्ताया बहुराष्ट्रियशान्तिसेनायाः शिविरे सञ्जाताच्छक्तिशालिनः प्रस्फोटवर्षणात् परःशताः फ्रान्सदेशीया अमेरिकादेशीयाश्च नटाः कथाशेषतां गताः । एवं लेबनाने प्रवर्तमानः शान्तिप्रयासो वितथो भवन्नस्ति ।

(१०) रूससमर्थितानां भियतनामसैनिकानां प्रत्यक्षहस्तक्षेपे पोलपोटस्य सर्वकारमपदस्थीकृत्य सत्तारूढेन कम्प्युचियाया हेमसामरिङ्गसर्वकारेण राज्यव्यापिनमसन्तोषं विप्लवं च शमयितुं नैव पारितम् । सीमासंघर्षः स्थाइलायन्डस्य शिरोव्यथा जाताऽस्ति । निर्वासितसर्वकारस्यांऽध्यक्षेण नरोदमसिहानूकेन संयुक्तराष्ट्रसंघोपवेशे कम्प्यूचियायाः प्रतिनिधित्वं विहितमस्ति ।

(११) दक्षिणाफ्रिकाया जामियायाश्च जातिगतः संघर्षोऽपि संयुक्तराष्ट्रसंघस्य शिरोव्यथा जाताऽस्ति ।

(१२) लाटिनामेरिकाराज्ये एल्सालभाडोरेऽमेरिकासमर्थितविद्रोहिभिः खण्डयोद्धृभि (गोरिल्ला) स्तत्रत्यसाम्यवादिसर्वकारमपदस्थीकर्तुं संघर्षः प्रवर्तितोऽस्ति ।

(१३) टर्कीत्रसिप्रियटानां स्वतन्त्रराज्यघोषणयाः कारणाद्भूमध्यसागरस्थितसाइप्रसराष्ट्रस्याऽग्रेऽपि स्वस्य सार्वभौमिकताऽखण्डता च कथं रक्षितव्ये इति समस्या समुद्भूताऽस्ति । टर्कीसिप्रियटनेतुर्डेङ्टासस्य स्वयंघोषिताय सर्वकाराय प्रदीयमानां मान्यतां प्रत्यादातुं संयुक्तराष्ट्रसंघेन विहितमाह्वानं टर्कीदेशीयानामधिकारिणां नैव सम्मतमस्ति ।

(१४) हिन्दमहासागरस्यैकस्मिंल्लघौ मरीससद्वीपे डियागो गार्सियायाममेरिकासैनिकशिविरस्य संस्थापनात्तत्क्षेत्रीयतटवर्तिराष्ट्रेष्वशान्तिः कोलाहलश्च प्रवर्धमानौ स्तः ।

(१५) वर्मायात्रासमये शहीदस्मारकस्थले जाताच्छक्तिशालिप्रस्फोटविस्फोटनाद्दक्षिणकोरियाया मन्त्रिणामधिकारिणां च हत्या जाता । तेन दक्षिणकोरियोत्तरकोरिययोर्मात्राधिकं वैमनस्यं वैरं चोपबृंहिते स्तः ।

(१६) दलाइलामामहोदयं स्वदेशे प्रत्यागमयितुं चीनस्य वर्तमानेन तेङ्नेतृत्वेन सातत्येनैव प्रयासः कृतोऽवगम्यते । तिब्बतक्षेत्रेऽपेक्षिता शान्तिसुरक्षा नैवाऽद्युनाऽपि वर्तते इत्यादि । अलं बहुना वर्तमानाऽन्तर्राष्ट्रियस्थितिप्रदर्शनेन । अतोऽन्यदेव विगतं किञ्चिदुच्यते—

पुरा राष्ट्राणां मिथ आक्रमणानि युद्धानि च ऽवरोद्धुमक्षमत्वादेव राष्ट्रसंघस्य (लिग अफ नेसन्स) भङ्गो जात आसीत् । उदाहरणार्थम् यथा – पोलैण्डदेशो लिथुआनियायाः प्रसिद्धनगरे विलनायाम् बलादधिकारं चकार । परं फ्रान्स-ग्रेटब्रिटेनेटलीनां प्राप्तसमर्थन वात्पोलैण्डस्य राष्ट्रसंघस्तं (पोलैण्डं) दण्डयितुं नाऽशक्नोत् । इटलीदेशो यूनानस्य कोर्फूद्वीपं बलादधिचकार । युनानेन राष्ट्रसंघायाऽवेदनमदायि । परं राष्ट्रसंघ इटलीं विनेतुं न ऽशक्नोत् । मञ्चूरियायामकस्माज्जापानेनाऽभिषेणितायां चीनदेशो राष्ट्रसंघाय जापानमभियोज्याऽवेदनं दत्तवान् । राष्ट्रसंघस्तत्संबन्धे निरीक्षितुं प्रतिवेदयितुं च समितिं संघटय्य नियुक्तवान् । समितिर्निरीक्ष्याऽनुसन्धाय चाऽन्ततो जापानं दूषयित्वा प्रतिवेदितवती । परं राष्ट्रसंघो जापानस्य विरोधे न

किञ्चित्कर्तुमपारयत्। इटलीदेशोऽबिसिनियामाक्रम्य बलात् स्वराज्यान्तर्गतामकरोदिति राष्ट्रसंघीयाः समस्ताः सदस्या इटलीदेशमाक्रामक इत्युदघोषयन्। तथात्वेऽपि न राष्ट्रसंघ इटलीदेशं पथि स्थापयितुमशक्नोदित्यादि। उपर्युलिखितान्येतान्येव कारणान्यासन् प्रथमस्य राष्ट्रसंघस्य भङ्गस्य। तेनाऽहं ब्रवीमि—वर्तमान संयुक्तराष्ट्रसंघस्य पुरतः प्रथमराष्ट्रसंघभङ्गकालिकविश्वसमस्याभ्योऽपि विकटविकटा, अनल्पैः प्रयासैरप्यसमाहिता दुःसमाधेयाश्च समस्या दरीदृश्यमानाः संयुक्तराष्ट्रसंघं भूयोभूयः परिहसन्ति। सैषा स्थितिर्न क्षेमायाऽस्ति राष्ट्रसंघस्य। यत एषा परिवर्तनीयाऽस्ति यथाशीघ्रम्। अन्यथैषा स्वल्पेनैव कालेन प्रथमं राष्ट्रसंघमिव वर्तमानसंयुक्तराष्ट्रसंघमविश्वासस्योपेक्षणीयत्वस्य भङ्गस्य च दशां निःसन्देहं प्रापयिष्यन्ति। तेन संयुक्तराष्ट्रसंघस्तां शोचनीयां दशां मा स्म गमदिति तस्मै यथाबुद्धि लघीयानेष परामर्शो दीयते—

यद्यपि संयुक्तराष्ट्रसंघस्य पुरतः प्रत्यक्षतो विधानतो वा ऽन्तर्राष्ट्रिया एव समस्या आपतन्ति। परं न केवलं ता एवाऽपितु राष्ट्राभ्यन्तरीयाः परोक्षतो निरीक्षणीया परंपरया समाधेयाः कतिपयाः समस्या अपि तस्य शिरोव्यथाभूताः प्रतीयमानाः सन्ति। ताः समस्याः प्रायो वैचारिकसंघर्षमय्यः, सांप्रदायिकवैरनिर्यातनपरा, वर्गवैमनस्यसमुद्भूता वा राष्ट्रेऽशान्तिकारिण्यो दरीदृश्यन्ते। तेन सर्वप्रथमं तावत्संयुक्तराष्ट्रसंघो राष्ट्राभ्यन्तरीयाः समस्याः समाधातुं विश्वस्य सर्वेषु राष्ट्रेषु संक्षिप्तसर्वसमानराज्यसंचालननीतिकार्यक्रमलिखितनिर्देशपुर्वकम् ◈ शक्त्यादर्शस्य राजतन्त्रस्य प्रतिष्ठापनं कारयतु। यद्येवं सर्वेषु राष्ट्रेषु शक्त्यादर्शराजतन्त्रव्यवस्थाः प्रत्यस्थापयिष्यन्त तर्हि जनानां निष्प्रयोजना सर्वोच्चा राजनीतिकी महत्त्वाकांक्षा, वादसंप्रदायविजयप्रतिस्पर्धामूलका उग्रविवादा; तत्प्रयुक्ताऽशान्तिश्च सर्वे क्रमशो हिमविलायं व्यलेष्यन्त। तथा

◈ संयुक्तराष्ट्रसंघेन राष्ट्रेभ्यो प्रदास्यमाणे सर्वसमानराज्यसञ्चालननीतिकार्यक्रमलिखितनिर्देशनेऽवश्यमनिवार्यतया समावेश्याः कतिपयविषया अधस्ताद्दीयन्ते—

(१) सर्वेषु राष्ट्रेषु स्वतन्त्रन्यायपालिकाकार्यपालिकाविधायिकानां पृथग्व्यवस्थया सह स्वतन्त्रस्य लोकसेवायोगस्य, महालेखापरिषदः, निर्वाचनायोगस्य च नैरन्तर्यं नैव विच्छेद्यम्।

(२) आवश्यके राजनीतिकनागरिकाधिकारोपभोगे माऽस्तु कश्चित्प्रतिबन्धः।

सति राष्ट्राणां सीमाविवादसंबन्धे, तथा विस्तारवादिनामार्थिकसाम्राज्यवादिनां स्थूलानां सूक्ष्माणामाक्रमणानां संबन्धे च केवलं विचारयितुं राष्ट्रसंघोऽवकाशं लभेत। तस्य कार्यभारस्यार्धं चाऽवसितं भविष्यति।

---

(३) सर्वेष्वपि सार्वजनिकक्षेत्रेषु प्रसिद्धानां नेतृस्थानीयव्यक्तिविशेषाणामाजीविकाव्यवस्थापनेन सह तेषां व्यक्तित्वानि, प्रतिष्ठा, जीवनानि च राज्यत एव संरक्षितानि भवेयुः।

(४) राष्ट्रे कस्मिश्चिदपि क्षेत्रे, कस्यचिदपि जनस्य शोषणं पीडनं च मा भवताम्।

(५) आराष्ट्रं लघूनां गृहोद्योगानां प्रसारः कर्तव्यः, येन राष्ट्रे सर्वेषां स्त्रीपुंसानां हस्ताः सदा कर्मव्यापृता भवेयुः, न कञ्चिदपि जनं प्राथमिकार्थिकचिन्तानलो राष्ट्रे दहतु।

(६) बालकानां राष्ट्रे निःशुल्का शिक्षा–व्यवस्था भवतु। षष्टिवर्षदेश्या वृद्धा जना विनाश्रमं भ्रियन्ताम्।

(७) महान्त उद्योगकार्यालया राज्यत एव संचाल्यन्ताम्।

(८) निम्नलिखिता व्यक्तिविशेषास्तीक्ष्णेन दण्डेन योज्यन्ताम्—

(क) यो विदेशं कञ्चिदाक्रमितुं परं प्रोत्साहयति, प्रवक्ति, लिखति वा।

(ख) यो राष्ट्रे निरंकुशशासनाय परं प्रोत्साहयति, प्रवक्ति, लिखति वा।

(ग) यः संयुक्तराष्ट्रसंघस्यैतत्प्रस्तुतमभियानमथवा विश्वशान्तिकार्यक्रमान्तर्गतानां जपतुसंस्कृतभावनाकार्यान्वियनमहासभाविधानानुसारं विश्वस्य राष्ट्रेषु संस्थापयिष्यमाणानां विश्वशान्तिशिविरशाखानां नीतिकार्यक्रमानालोचयेत्, निन्देत् अवधीरयेच्च।

(घ) यो राजमुकुटं, देशस्याऽखण्डतां, राष्ट्रियस्वतन्त्रतां, राष्ट्रभाषां राष्ट्रियधर्मं संस्कृतिम् तदाधारां संस्कृतभाषाम्, स्वधर्मग्रन्थाज्ञानुसारं प्रचलितान् विधीनाचाराननुष्ठानानि, पारम्पर्येण प्रचलितानि विद्यादानसंबन्धिधार्मिकसत्राणि वा क्शयितुं निर्बलयितुमुन्मूलयितुमाक्षेप्तुमालोचयितुं लिखति, प्रवक्ति प्रचारयत्युद्घोषयति वा।

(ङ) यो निजराष्ट्रस्य रहस्यं विदेश्यान् सूचयति, स्वराष्ट्रविरोधिनां विदेश्यानां गुप्तसाहाय्यं करोति वा।

(च) यः शान्तिसुरक्षावातावरणं भनक्ति।

तत्पश्चाद्भाविषु राष्ट्रसंघीयाऽधिवेशनेषु राजकीयस्तराणामेव व्यक्तिविशेषाणामुपस्थास्यमानत्वादुच्छृङ्खलमर्यादाहीननीतिनिर्णयाऽवरोधात्क्रमशो विश्वशान्तेरालोको भासमानो दृग्गोचरो भविष्यति । अतो वर्तमानाऽन्तर्राष्ट्रियस्थितीनां सामस्त्येन समाधानायाऽपि शक्ताया आदर्शाया राजतन्त्रव्यवस्थाया एवाऽवश्यकताऽस्ति ।

एवं विश्वस्याऽविकसितानां, विकसितानां च राष्ट्राणां तथाऽन्तर्राष्ट्राणां च समस्यानां व्यापकाय समाधानायाऽपि शक्ताया आदर्शाया राजतन्त्रव्यवस्थाया एवाऽवश्यकतायां सुप्रतिपादितायां विश्वशान्तिरूपाऽन्तिमलक्ष्यपूर्तये विश्वस्मिन्कीदृशी व्यवस्था प्रतिष्ठाप्येति प्रश्नस्य समाधानं भङ्ग्यन्तरे वस्तुतः सम्पन्नमेव—"शक्तादर्शराजतन्त्रव्यवस्थैव प्रतिष्ठाप्येति ।" तथाऽपि विश्वशान्तिविषयस्यैव मिमण्डयिषया, सिषाधयिषया प्रशिशंसया, तदाजिघृक्षया च द्विचतुरान् शब्दांस्तद्विषये पृथग् विलिख्य स्वलेखनीं कृतार्थयामि—

(४) विश्वशान्तिरूपलक्ष्यपूर्तयेऽपि शक्तादर्शराजतन्त्रस्यैवाऽवश्यकताऽस्ति—

यस्य कस्यचिदपि कार्यस्योत्पत्तये कारणस्य ऽवश्यकता भवति । एवं प्रकृतविश्वशान्तिरूपकार्यसिद्धयेऽपि केनाऽपि तत्कारणेनाऽवश्यं भाव्यम् । किन्तत्कारणमिति गवेषिते विश्वबन्धुत्वभावनाया विकास एव तत्कारणत्वाय कल्पते । विश्वबन्धुत्वभावनाया विकासाय च तस्या भावनाया आधारभूतायाः सुरभारत्याः संस्कृतभाषायाः सार्वभौमप्रचारप्रसाराभ्यां भाव्यम् । तस्याः संस्कृतभाषायाः सार्वभौमप्रचारप्रसारार्थे चाऽध्यात्मिकभावनाविकासस्य महिमाऽतिशयमवगच्छन्त्या इच्छन्त्याश्च कस्याश्चिद व्यवस्थायाः सार्वभौमं प्रतिष्ठापनमावश्यकं भवति । तादृशी च व्यवस्था न ऋते शक्तादर्शराजतन्त्रव्यवस्थाया अन्या काचिद् भवितुं शक्नोत्यर्हति वा । अतोऽन्त एष एव हि निष्कर्षो भवति— "नाऽन्यः पन्था विद्यतेऽयनाय—विश्वशान्तेः प्राप्तयेऽपि विश्वस्याऽन्तिमाश्रयायाऽध्यात्मवादाय प्रश्रयं ददत्याः शक्तादर्शराजतन्त्रव्यवस्थाया एव प्रतिष्ठापनेन भाव्यम् । विश्वशान्त्यध्यात्मवादविषयावेकस्या एव टङ्कमुद्रायाः परस्परपूरकौ, परस्पराधारितौ, सहास्तित्व–सहनास्तित्वे बिभ्रतौ

(छ) यो मंत्रिसचिवाद्युच्चजनसेवकपदस्थोऽपि गर्वेण स्व महान्तं मन्यमानस्तानेव सेव्यानुपेक्षते, न्यक्करोति, तिरस्करोति वा ।

(ज) यो भ्रष्टाचारेण धनान्यर्जयति, वेदं वेदं परकृतां राष्ट्रियसंपदां क्षतिमुपेक्षते, स्वयं च ताः क्षाययति ।

द्वौ पक्षौ स्तः। नैतयोरेकस्य विनाभावोऽसंयोगः पृथग्भावो वा क्वचित्कदाचिद्वा संभवति।

किञ्च— बी. बी. सी. लण्डनस्य समाचारमाकर्णयन्तः सर्वे जानन्ति यदद्यत्वे नास्त्येव कश्चित्तादृशो दिवसो यदा निम्नलिखितप्रकारकेषु हृदयविदारकतात्पर्यकसमाचारेष्वेकतमो न प्रसारितः स्यात्—

(१) जातु केचन विपक्षराष्ट्रजनाः कस्यचिद्वैदेशिकस्य गुप्तमाकस्मिकमपहरणं हिंसनं वा कुर्वन्ति।

(२) जात्वेकं राष्ट्रमन्यदभिषेणयति।

(३) जातु केचन धार्मिकराजनीतिकसंप्रदायवैरमिषेण मिथो हिंसनप्रतिहिंसने कुर्वन्ति।

(४) जातु कस्मिंश्चिद्राष्ट्रे हिंसात्मक आकस्मिको विप्लवः, सत्तारूढाणामपदस्थीकरणं हिंसनं च भवन्ति।

(५) जातु क्वचिद्राष्ट्रे क्रूरो जनपीडको राष्ट्रपती राष्ट्राध्यक्षो वा स्वविपक्षजनान् पशुमारं मारयति।

विश्वस्यैतादृशे हिंसाप्रतिहिंसामये रक्तरञ्जिते नारकीये वातावरणे शक्तादर्शराजतन्त्रच्छत्रच्छाये विश्वबन्धुत्वभावनायास्तदाधारभूतायाः संस्कृतभाषायाश्च यदि सार्वभौमप्रचारप्रसारौ न क्रियेयाताम्, सैषा विकटविकटा विश्वसमस्या नैव जातु समाधास्यत इति निश्चप्रचम्। संयुक्तराष्ट्रसंघो यदि विश्वशान्तिं दिदृक्षते, एतद्वर्जं कोऽस्त्यन्यो मार्गस्तथा समाधानाय तस्य पुरतः?

ममोपर्युक्ते दृष्टिकोण इटलीदेशस्य महतो राजदार्शनिकस्य दांतेमहोदयस्य राजनीतिकेन दर्शनेनाऽपि शक्तिसञ्चारः कृतोऽस्ति। तेनाऽहं तं विश्वस्य राजनीतिकसमस्यानां कृते महान्तमेकं शल्यचिकित्सकमेव मन्ये। तत्र भवतो दर्शनमासीत्— "न केवलमिटलीदेशेऽपितु विश्वशान्तये विश्वकल्याणाय चाऽविश्वमेव शक्तादर्शराजतन्त्रव्यवस्थायाः प्रतिष्ठापनेन भाव्यमिति।"

वर्तमानयुगे कतिविधानां राजनीतिकपद्धतीनां विकासप्रयोगौ जायमानौ स्तः। ईदृशे समयेऽहमेकोऽतियातयामाया राजतन्त्रव्यवस्थाया गुणगानं यत् कुर्वन्नस्मि, तत्सत्यमहमेकान्ततः पश्चिमां दिशमभिगच्छन्नस्मि, यदाऽन्ये सर्वे प्रबुद्धाः पूर्वां गच्छन्तः सन्ति।

नैतत्, यथा वर्तमानयुगे स्पेनस्त्यक्तप्राग्व्यवस्थो राजतन्त्रं पुनः प्रतिष्ठापयति, तृतीयविश्वनेतृत्वाभिमानी प्रगतिशीलंमन्यश्चीनमहादेशश्च राजकुमारं

सिद्धान्तक्रमेव पुन: कम्यूनियायां प्रतिष्ठापयितुं कामयते, तथा स्थितिसापेक्षैवा-वश्यकता भवति कस्यचिद्वादस्य तन्त्रस्य वेति मन्वान: स्वतन्त्रचेता अहमपि सांप्रतम् विश्वस्मिन् सर्वेषु राष्ट्रेषु शक्तादर्शराजतन्त्रं स्थापयितुं समीहे। अथवा विश्वपरिस्थितिदर्शनाद्विचारत: स्पेन चीनावनुसरन्नहं कियत् दोषभाज-नमभवम्, स्वयं न जाने।

नैतत्, वस्तुतस्तु सर्वेऽपि वयमेकस्यामेव राज्ययन्त्राधीनायां पद्धतौ स्म:। मम विश्लेषणे तु राज्यपद्धतेर्द्वावेव प्रकारौ स्त:। एका राज्ययन्त्राधीना व्यवस्थाऽपरा राज्ययन्त्रहीना च। राज्ययन्त्रहीना व्यवस्था महाभारतवर्णिते कस्मिंश्चित् समये आसीत्। याऽधुनिकयुगस्य प्रसिद्धराजदार्शनिकाभ्यां प्रिन्सक्रोपाट्किन-रस्किनाभ्यामपि बहु प्रशंसिताऽऽसीत्। तत्प्रशंसासन्दर्भे नि:सङ्कोचं वक्तुं शक्यते, यत्—मानवमात्रस्य हितचिन्तकस्य दार्शनिकस्य च कार्लमार्क्सस्य तथा विश्ववन्द्यस्य महात्मनो गान्धेश्च ऽन्तिमराजनीतिकलक्ष्यभूतस्य राज्ययन्त्र-हीनस्य वैषम्यहीनस्य च व्यवस्थाविशेषस्य कल्पनाया अनुप्राणिका प्रेरिका च सैव व्यवस्थाऽऽसीत्। परमादिमसाम्यवाद इत्याधुनिकै: परिचिता सा व्यवस्था वर्तमानयुगे नैव कार्यान्विता भवितुं शक्नोति। यतस्तदर्थे महात्मनो गान्धेष्टालस्टायस्य चोपदेशमहत्त्वं जानता, तदनुसारं चिकीर्षता, परिष्कृतेन, जागरितेनाहिंसकेन तथा कर्मठेन जनसमाजेन सज्जेन भवितव्यम्। पर-मस्मिन् युगे नैतत्संभाव्यते। अतोऽवशिष्यतेऽपरा राज्ययन्त्राधीना पद्धति:, मम विश्लेषणे प्रजातन्त्रवादिसाम्यवादिसमाजवाद्यधिनायकवादिन्यो व्यवस्था: सर्वा: (काचित् स्वातन्त्र्यमात्रे, काचिदार्थिकसमानतामात्रे, काचि-द्राष्ट्रराष्ट्रियताप्रतिष्ठासंरक्षणमात्रे साग्रहा) काममप्येकैकां स्वां विशेषतां रक्षन्तु, पृथङ्नामानि च बिभ्रतु, परं ता: सर्वा राज्ययन्त्राधीना: सत्यो राजतन्त्र-व्यवस्थाया एव विकृतयो मन्यन्ते। यत: (प्रमाणरूपे) पुरा राज्यसंस्थोत्पत्ति-पृष्ठभूमौ जनैर्भाविना राज्ञा सह य: पणबन्धो विहितोऽनुरोधश्च वर्तमानयुग-जनसमुदायेनाऽपि तैस्तैर्नववादव्यवस्थासंचालकेभ्यो व्यक्तिविशेषै: सहाऽद्याऽपि (मनसा वा वाचा) स एव पणबन्ध: क्रियमाणोऽस्त्यनुरोधश्च—"अस्माकं कृते शक्तं सफलं च शासनं कुरु। अस्मासु ये सन्ति शान्तिसुरक्षाबाधका, हिंसका, दस्युचरित्रा दुष्टास्तान् यथोचितं दमय, दण्डय। निर्बलानस्मान् संरक्ष। वयं त्वत्साहाय्यार्थं स्वार्जनांशतस्त्वत्कोषसंवर्धनं करिष्याम:। सर्वोच्चया च प्रतिष्ठया त्वां योजयिष्याम:। अस्मासु दृढं शासनं विधेहीति।"

सनातनपरंपरात: प्रचलितस्याऽस्यैव समय (पणबन्ध) स्याऽनुसारेणाऽ-द्यावध्यप्यन्यव्यवस्थासञ्चालका अप्यात्मानं राज्ञ एव स्थाने प्रतिष्ठितं मन्यमाना राजवदादेशनिदेशान् कुर्वन्त: सन्ति तदात्वे जनैराजार्थे प्रतिज्ञातानां राजकीयसौविध्यानामुपभोगमद्यावध्यपि ते कुर्वन्त: सन्ति। राज्ञ एव स्थाने

प्रतिष्ठितं मन्यमानाः इत्यस्य तात्पर्यं त्वेतत्—जना न तेभ्यो हृदयेन राजस्थानं ददति । तांस्तु जना हृदयेन स्वसमानानेव मन्यन्ते— एतद्भवति तेषां मनोविज्ञानम् । जनतानामेतन्मनोविज्ञानमेव मुख्यं तत्कारणमस्ति, येन व्यवस्थान्तरस्य ते ते सञ्चालकव्यक्तिविशेषा राजान इव जनान् स्वनियन्त्रणे स्थापयितुं नो पारयन्ति । जनाननवरतं नियन्त्रणे संस्थाप्य, तान् मिथो घातप्रतिघातात् संरक्ष्य, तेषां कृत उन्नतिमार्गोद्घाटनमेव हि राज्यस्य प्रयोजनम् । यतो जनाः स्वभावतोऽशुद्धा असहिष्णवः स्वार्थपरायणा महत्त्वाकांक्षिणः पापसंकल्पाश्च भवन्ति । यथाचोक्तं कामन्दकेन—

इदं प्रकृत्या विषयैर्वशीकृतम् परस्परस्त्रीधनलोलुपं जगत् ।
सनातने वर्त्मनि साधुसेविते प्रतिष्ठते दण्डभयोपपीडितम् ।

जना राजदण्डभयेनैव स्वस्य क्रूरप्रकृतेः संवरणं विधाय व्यवहरन्तो भवन्ति । शासने शिथिलतां गते जनानां सा दुष्टा प्रकृतिः निर्बलेषु प्रतिक्रियापरा भवत्येव । जनानां सैषा प्रकृतिर्व्यवस्थान्तराणां सञ्चालकान् हृदयेन नैव प्रत्येति, तेभ्यो न बिभेति, तान् नैव मानयति च । किञ्च—लोकप्रियता, आवश्यकार्थसंपन्नता, स्वपक्षविश्वासश्चेतत्त्रयाधीनं हि केवलं निर्वाचनसाफल्यम् । तेषु (१) खरप्रकृतित्वे लोकप्रियता नश्यति, (२) पर्याप्तार्थसंग्रहाशक्तौ साधनहीनता भवेत्, (३) मतानामात्मनि विश्वस्तस्य, स्वपक्षधरस्य, वर्गस्य समुदायस्य वा हस्तत एव निःसन्देहं साकल्येन प्राप्यत्वात् आत्मनो निष्पक्षतायां सर्वसमानतायां वा प्रदर्शितायां स्वपक्षधराणां विश्वासापगमात् साकल्येन ततो मतप्राप्तौ सन्देहप्रसक्तेर्निर्वाचनस्यैव साफल्ये सन्देहो भवेदिति विचारयन्तो व्यवस्थान्तरस्य सञ्चालका वज्रादपि कठोरैः कुसुमादपि मृदुभिर्लोकोत्तरै राजर्षिभिः सञ्चालयितव्यानि शासनप्रशासनानि निष्पक्षतया कर्तुं कथं शक्नुयुः ?

प्रमाणाय सत्यैव घटनाऽत्रोल्लिख्यते—अद्यत्व एव केनचित् प्रमुखजिल्लाधिकारिणा (मण्डलदण्डाधिकारिणा) कश्चिन्मण्डलनेता सानुरोधमुक्तः—"भवान् स्वमण्डलनिवासित्वात् परिचिनोत्येव तम् । जनपीडको हिंसकश्चाऽमुको दस्युर्निलायं निलायं मण्डलान्तरेव भ्रमति । प्रतिक्रियाभयेन सर्वे मण्डलनिवासिनस्तं स्वस्वगृहेषु निलापयन्ति । अस्माकं प्रहरिणस्तं द्रष्टुमपि नो पारयन्ति । अतस्तस्य प्रग्रहाय भवतः साहाय्यमनुरुणध्मि" इति ।

तमुत्तरयन् मण्डलनेता प्रोचे— "श्रीमन् ! निर्वाचनानन्तरमेवाऽहं भवत्साहाय्यं कर्तुं शक्नोमि । प्रतीक्षताम् भवान् मासचतुष्टयम् । वरमयमपि भवदनुरोध आवयोर्हृदय एव तिष्ठतु । यदि कुतश्चित् स आकर्णयेत् स मम

बहुमतदापनसमर्थान् प्रमुखान् मत्पक्षधरानेव स्पष्टं तर्जयिष्यति—"मारयामि, गृहं दाहयामीत्यादिप्रकारेण।"

तेनाऽहं ब्रवीमि—एतादृशेभ्यो जनेभ्य:—

'राष्ट्रदा असि राष्ट्रं मे देहि'—यजुर्वेद

(हे भगवन्! त्वं राष्ट्रस्य दाता असि। मह्यं राष्ट्रं देहि!)

ईदृशी राष्ट्रियभावना, राष्ट्रप्रेम्ण उद्गारश्च कथमुद्भवेत्'म्?

'राष्ट्रे जागृयाम पुरोहिता वयम्'—यजुर्वेद

(राष्ट्रहितं पुरो निधाय वयं सदा जागरिता: स्याम)

राष्ट्रहितस्य कृतेऽन्त:करणादेवैवमभ्यर्थयमानोऽपि लभ्यते व्यक्तिविशेष: कश्चिद्राजतन्त्रेतरव्यवस्थाऽविचलितो दृढसङ्कल्पवान्? अन्यस्मिन् दलान्तरप्रतिनिधावुन्नतिपथमारूढे तमविषह्य मार्गान्तरं (राष्ट्रहितमेकतोऽपसार्य) जिघृक्षव एवोपलभ्यमाना: सन्ति जना परोलक्षा:।

तथादृशानां राज्यसत्तायां—"ततो राष्ट्रं बलमोजश्च जातम्" एवं वेदोक्त्यनुसारिणी तेजस्विनी वर्चस्विनी राष्ट्रियता, बलमोजश्च राष्ट्रे नैव कदाचिदाविर्भवितुं शक्नुवन्ति। तादृशी शासनसत्ता न जनान् मर्यादायामनुशासने वा स्थापयितुं शक्नोति। "सर्वो दण्डजितो लोक:"—दण्ड एव हि जनसमुदायान् सन्मार्गे प्रवर्तयत्यनुशास्ति च। तदभावे कथम् शान्ति: सुरक्षिता भवेत्? राजतन्त्रेतरोव्यवस्थानां जनसमुदाया राष्ट्रपतिम् मंत्रिणम् प्रहरिप्रमुखं तथाऽन्यानपि दण्डाधिकारिणो नाटकस्य राष्ट्रपतिम्, मंत्रिणं, प्रहरिप्रमुखमिव मन्वाना अवहेलयन्ति। यथा यावत्ते मञ्चेऽभिनयन्तो भवन्ति, तावत् दृश्यन्ते, मान्यन्ते च। तदनन्तरं मध्यान्तरे वाऽभिनयावसाने दर्शकै: सहैव स्थीयते, भुज्यते, समानभावेनाऽश्लिष्यते, परिहस्यते, आलोच्यते च। एतादृशे मूल्याङ्कने जाते जनसमुदाया एतेभ्य: कथं बिभ्यति? तेनैव न्यायनिष्ठो भूत्वा दृढतया जनसमुदायान् स्वीयेऽनुशासने स्थापयितुं समर्थस्य प्रजावत्सलस्य राज्ञ इतिहासो न जीर्यति, न च म्रियते। शक्ते, आदर्शे राजतन्त्रेऽन्यायात्याचारी, उद्दण्डतोच्छृङ्खलते च कथं स्वतस्तिरोभवन्तीति स्वमतं महाकवि: कालिदासो दिलीपकार्तवीर्यशक्तादर्शशासनकथामिषेण व्यनक्ति—

(१) ऊनं न सत्त्वेष्वधिको बबाधे
तस्मिन् वनं गोप्तरि गाहमाने

(२) वातोऽपि नाऽस्रंसयदंशुकानि
को लम्बयेदाहरणाय हस्तम्?

अकार्यचिन्तासमकालमेव प्रादुर्भवंश्चापधरः पुरस्तात्
अन्तः शरीरेष्वपि यः प्रजानां प्रत्यादिदेशाऽविनयं विनेता

शक्त दशराजतन्त्रवर्जमन्याभ्य उपव्यवस्थाभ्य एवमनुशासनं क्वचित्संस्थाप्येत ? पाञ्चालिकाक्रीडोपमेयानामीदृशीनामुपव्यवस्थानामपेक्षायां तु न केवलमनुशासनस्य प्रतिष्ठापनाय, न केवलं च शान्तिसुरक्षयाः स्थैर्याय ऽपितु राष्ट्रस्य सर्वाङ्गीणविकासायैव क्लृप्तोपकारं खलु जाति राजतन्त्रं नाम। श्रूयताम् (राजतन्त्रे) कस्यचिदृषेः प्रश्नोत्तरे राज्ञाऽश्वातिना विहितं स्वराज्यस्य सर्वाङ्गविकसितायाः शान्तायाः समृद्धयाश्च स्थितेः संक्षिप्तं विवरणम्—

न मे स्तेनो जनपदे न कदर्यो न मद्यपः
नाऽनाहिताग्निर्नाऽविद्वान् न स्वैरी स्वैरिणी कुतः ?

भविष्यत्पुराणस्य सर्गोपवर्ण्यप्यादर्शराजतन्त्रस्य देशस्य स्थितेश्चित्रणमेवं विहितमस्ति—

ग्रामे ग्रामे स्थितो देवो देशे देशे स्थितो मखः
गेहे गेहे स्थितं द्रव्यं धर्मश्चैव जने जने

य एतादृशीं व्यवस्थां स्वयं कर्तुमशक्ताः सत्त्वसाहसहीनाः स्युस्ते तस्याः प्रचारमेव विरुन्धन्ति । तदृशा जनजीवनद्रोहिणो देशस्याऽशान्तेः कारणभूतास्तथाकथिता राजनीतिकहतकास्तां स्वर्णमयीं स्वर्गीयां व्यवस्थां काल्पनिकीमविश्वसनीयां वा कथयितुं निन्दितुमालोचयितुं वा न त्रपन्ते । अत्र युक्तमेवोक्तम् विद्वद्भिः—

अशक्तास्तत्पदं गन्तुं ततो निन्दां प्रकुर्वते ! इति ।

अहं ब्रवीमि—किमनेन निन्दनेनाऽसहनेनाऽन्याय्यचिन्तनेन वा ? उक्तमेवाऽस्ति—"गुणः खलु अनुरागस्य कारणं न बलात्कारः" । किं वा बलात्कारेण ? अन्यासूपव्यवस्थासु यदि कश्चिद्गुणो दृग्गोचरो भवेत्, अहमप्याकृष्टो भवेयमेव । यदि कश्चिन्मह्यमेकमवैतिहासिकं प्रमाणं राजतन्त्रापेक्षयाऽन्याभिरुपव्यवस्थाभिः कृतस्य सर्वाङ्गपूर्णस्य स्वर्णमयशासनस्य दातुं शक्नुयात्, तर्ह्यहं राजतन्त्रविषयकं स्वमाग्रहं कात्स्न्र्येनैव त्यजेयम् । न केवलमद्यत्वे, प्रागपि सहस्रेभ्यो वर्षेभ्यो राजतन्त्रस्य विकल्पो न विचारितो नाऽसीत् । न च प्रयोगश्च विहितो नासीत् ।एतत्सुस्पष्टं भवति ऋग्वेदस्य ब्राह्मण ऐतरेयब्राह्मण ऋषिमण्डलेन कृताया अष्टविधराज्यव्यवस्थाघोषणायाः । तासां राज्यव्यवस्थानामासन्नामानि—'साम्राज्यं, भौज्यम्, स्वराज्यम्, वैराज्यम्, पारमेष्ठ्यम्, राज्यम्, महाराज्यम्, आधिपत्यमयं चेति । एतासामपि वैशिष्ट्य-

मपेक्षाकृतमावहन्त्यः काश्चन व्यवस्था आसन्। यथा भौज्यशासनप्रणाली—अस्यां प्रणाल्यां शासको यावन्मात्रस्य (भौमिक) क्षेत्रफलस्य जनानां भोजन-वस्त्रसुरक्षाप्रबन्धाय क्षमो भवति, तावन्मात्रस्यैव क्षेत्रफलस्य शासनाय सोऽधिकारी भवति। वैराज्यशासनप्रणाल्यां सर्वाः प्रजा एकत्र समवेत्य स्वव्यवस्थायाः कृते निर्णयन्ति स्म, तं निर्णयं च स्वयं स्वयमेव कार्यान्वितं कुर्वन्ति स्म। स्वराज्यशासनप्रणाल्यनुसारं त्वेकस्य व्यक्तिविशेषस्य शासनाधिकारो न भवति स्म। बहुभिर्जनैर्बहूनां संमत्या च संकुचितभावनात्यागेन शासनं क्रियते स्म। अस्य राजनीतिकसंप्रदायस्य प्रचारकोऽत्रिगोत्रीयो रातहव्यनामक ऋषि-रासीत्। एष आसीत्तस्योद्घोषः—

'व्याचष्टे बहुपाय्ये यतेमहि स्वराज्ये'

(विस्तृतरूपेण बहुजनसञ्चालनीयेनाऽनेन व्यवस्थाप्रकारेण वयं जनहि-ताय प्रयतामहै)।

